# भारतीयदर्शनम्

# ( 247 )

## शिक्षक-अङ्कितमूल्यांङ्कन-पत्रम्

पूर्णांका : 20

**निर्देशा :**

(i) सर्वे प्रश्ना अनिवार्या:। प्रश्नस्य दक्षिणे पार्श्वे संख्या अङ्कान् निर्दिशति।

(ii) उत्तरपुस्तिकाया: प्रथमपृष्ठे स्वनाम्, अनुक्रमाङ्कसंख्या, शिक्षणकेन्द्रस्य नाम इति सर्वं लेखनीयम्

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत- 2

(क) नास्तिकदर्शनानां नामानि लिखत। (दृष्टव्यम् - 1-9)

(ख) ''दर्शनस्य आवश्यकताम् उपपादयत।'' (दृष्टव्यम् - 1)

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत- 2

(क) ''नित्यानित्यवस्तुविवेक:'' इति व्याख्यायताम्। (दृष्टव्यम् - 17)

(ख) आस्तिकदर्शनानां प्रणेतार: के?। लिखत। (दृष्टव्यम् - 1)

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत- 2

(क) निम्बकाचार्यस्य विषये टिप्पणी लिखत। (दृष्टव्यम् - 16.3)

(ख) न्यायदर्शनस्य आचार्यपरम्परां लिखत। (दृष्टव्यम् - 10)

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्दात्मकं लिखत- 4

(क) ''सगुणब्रह्म'' इति विषयं स्पष्टयत। (दृष्टव्यम् - 12)

(ख) 'भावनाविचार:'' इति विषय सप्रकारं विशदयत। (दृष्टव्यम् - 14.7)

5. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्दात्मकं लिखत- 4

(क) वेदानां प्रयोजनभेदेन भेदं विशदयत। (दृष्टव्यम् - 3.2)

(ख) वैशेषिकमते प्रमाप्रमाणानि च व्याख्यायताम् (दृष्टव्यम् - 11)

6. अधोलिखितेषु कमपि एकं विषमयधिकृत्य परियोजना-विवरणं लिखत- 6

(क) कालक्रमेण मीमांसादर्शनस्य आचार्याणां नामानि तथा तै: प्रणितानि संदर्भग्रन्थानां नामानि लिखत। (दृष्टव्यम् - 14)

(ख) दर्शनेषु साम्यमसाम्यं विषये तालिकानिर्माणं कृत्वा एका परियोजना निर्मीयताम्। (दृष्टव्यम् - 1)